# Shukla YajurvedIya SandhyA Morning-Noon-Evening

# શુક્લયજુર્વેદીયસન્ધ્યા પ્રાતઃ-મધ્યાહ્ન-સાયમ્

## Document Information

Text title : shuklayajurvedIyasandhyA prAtaH-mAdhyAna-sAyaM

File name : shuklayajurvedIyasandhyA.itx

Category : veda, svara

Location : doc_veda

Transliterated by : "Krunal Makwana" <makwanakb at googlemail.com>

Proofread by : "Krunal Makwana" <makwanakb at googlemail.com>

Latest update : February 18, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 18, 2025

*sanskritdocuments.org*

# Shukla YajurvedIya SandhyA Morning-Noon-Evening

# શુક્લયજુર્વેદીયસન્ધ્યા પ્રાતઃ-મધ્યાહ્ન-સાયમ્

॥ અથ શુક્લયજુર્વેદીયપ્રાતઃસન્ધ્યાપ્રયોગઃ ॥

॥ ભસ્મધારણમ્ ॥

ૐ અગ્નિરિતિ ભસ્મ વાયુરિતિ ભસ્મ જલમિતિ ભસ્મ સ્થલમિતિ ભસ્મ
વ્યોમેતિ ભસ્મ સર્વँ હવાઽ ઇદમ ભસ્મ મનઽ એતાનિ
ચક્ષૂँષિ ભસ્માનિ ॥

॥ ગાયત્રિમન્ત્રઃ ॥

ૐ ભૂર્ભુવઃસ્વઃ ૐ તત્સવિતુર્વ્વરેણ્યમ્ભર્ગ્ગો દેવસ્ય ધીમહિ ॥

ધિયોયોનઃ પ્ર્રચોદયાત્ ॥

ૐ ત્ર્યમ્બકમિત્યસ્ય વસિષ્ઠ ઋષિઃ રુદ્રો દેવતા
અનુષ્ટુબ્છન્દઃ ભસ્માભિમન્ત્રણે વિનિયોગઃ ॥

ૐ ત્ર્યયમ્બકઁય્યજામહેસુગન્ધિમ્પુષ્ટિવર્દ્ધનમ્ ॥

ઉર્વ્વારુકમિવ બન્ધનાન્મૃત્યોર્મ્મુક્ષીયમામૃતાત્ ॥

ૐ ત્ર્યાયુષમિત્યસ્ય નારાયણ ઋષિઃ રુદ્રો દેવતા ઉષ્ણિક્છન્દઃ
ભસ્મધારણે વિનિયોગઃ ॥

ૐ ત્ર્યાયુષઞ્જમદગ્નેઃ કશ્યપસ્યત્ર્યાયુષમ્ ॥

યદ્દેવેષુત્ર્યાયુષન્તન્નોઽસ્તુત્ર્યાયુષમ્ ॥

॥ આચમનમ્ ॥

ૐ કેશવાય નમઃ સ્વાહા । ૐ નારાયણાય નમઃ સ્વાહા । ૐ
માધવાય નમઃ સ્વાહા । ૐ ગોવિન્દાય નમઃ । હસ્તં પ્રક્ષાલ્ય

॥ અથ દેવતાનમસ્કારઃ ॥

ૐ વિષ્ણવે નમઃ। ૐ મધુસૂદનાય નમઃ ।
ૐ ત્રિવિક્રમાય નમઃ । ૐ વામનાય નમઃ ।

ॐ શ્રીધરાય નમઃ। ॐ ઋષિકેશાય નમઃ ।
ॐ પદ્મનાભાય નમઃ । ॐ દમોદકરાય નમઃ ।
ॐ સંકર્ષણાય નમઃ । ॐ વાસુદેવાય નમઃ।
ॐ પ્રદ્યુમ્નાય નમઃ। ॐ અનિરુદ્ધાય નમઃ
ॐ પુરુષોત્તમાય નમઃ । ॐ અધોક્ષજાય નમઃ।
ॐ નૃસિંહાય નમઃ । ॐ અચ્યુતાય નમઃ।
ॐ જનાર્દનાય નમઃ। ॐ ઉપેન્દ્રાય નમઃ ।
ॐ શ્રીહરયે નમઃ। ॐ શ્રીકૃષ્ણાય નમઃ ।

॥ વિનિયોગઃ ॥

ॐ પ્રણવસ્ય પરબ્રહ્મ ઋષિઃ પરમાત્મા દેવતા દૈવી ગાયત્રી છંદઃ પ્રાણાયામે વિનિયોગઃ ॥

॥પ્રાણાયામઃ॥

ॐ ભૂઃ ॐ ભુવઃ ॐ સ્વઃ ॐ મહઃ ॐ જનઃ ॐ તપઃ ॐ સત્યમ્
ॐ તત્સવિતુર્વ્વરેણ્યમ્ભર્ગ્ગો દેવસ્ય ધીમહિ ॥ ધિયોયોનઃ પ્પ્રચોદયાત્ ॥

ॐ આપોજ્યોતીરસોऽમૃતં બ્રહ્મ ભૂર્ભુવઃસ્વરોમ્ ॥

એવં પૂરકઃ કુમ્ભકઃ રેચકઃ ઇતિ ક્રમેણ ત્રિવારં પઠેત્

॥ શિખાબન્ધનમ્ ॥

ॐ મનસ્તોક ઇતિ મન્ત્રસ્ય કુત્સ ઋષિઃ જગતી છન્દઃ એકો રુદ્રો દેવતા શિખાબન્ધને વિનિયોગઃ ॥

ॐ મનસ્તોકેતનયેમાન આયુષિમાનોગોષુમાનોऽશ્વેષુરીરિષઃ॥

માનોવ્વીરાન્રુદ્રભામિનોવ્વધીર્હવીષ્મન્તઃ સદામિત્વાહવામહે ॥

॥અઙ્ગન્યાસઃ ॥

ॐ વિષ્ણુર્વિષ્ણુઃ । વાક્ વાક્ પ્રાણઃ પ્રાણઃ ચક્ષુઃ ચક્ષુઃ શ્રોત્રં શ્રોત્રં નાભિઃ હૃદયં કણ્ઠેઃ મુખં શિરઃ શિખા બાહુભ્યાં યશોબલમ્ ॥

॥ માર્જનમ્ ॥

ॐ અપવિત્રઃ પવિત્રો વા સર્વાવસ્થાં ગતોऽપિ વા ।
યઃ સ્મરેત્પુણ્ડરીકાક્ષં સ બાહ્યાભ્યન્તરઃ શુચિઃ ॥

ૐ પવિત્રેસ્થોવ્વૈષ્ણવ્યૌસવિતુર્વઃ પ્રસવઽ
ઉત્પુનામ્મ્યચ્છિદ્રેણ પવિત્રેણ સૂર્ય્યસ્ય રશ્મિભિઃ
તસ્યતે પવિત્રપતે પવિત્ર પૂતસ્ય યત્કામઃ પુનેતચ્છકેયમ્ ॥

॥ સઙ્કલ્પઃ ॥
ૐ અત્રાદ્ય મહામાઙ્ગલ્યફલપ્રદમાસોત્તમેમાસે અમુકમાસે
અમુકપક્ષે અમુકતિથૌ અમુકવાસરે મમોપાત્તદુરિતક્ષયર્થં
બ્રહ્મવાપ્તયે પ્રાતઃસન્ધ્યોપાસનમહં કરિષ્યે ॥

॥ ભૂમિપ્રાર્થના ॥ ॥ વિનિયોગઃ ॥

ૐ પૃથિવીત્યસ્ય મેરુપૃષ્ઠ ઋષિઃ સુતલં છન્દઃ કૂર્મો
દેવતા આસને વિનિયોગઃ ॥

ૐ પૃથ્વિ ત્વયા ધૃતા લોકા દેવિ ત્વં વિષ્ણુના ધૃતા ॥

ત્વઞ્ચ ધારય માં દેવિ પવિત્રં કુરુ ચાસનમ્ ॥

ૐ કૂર્માય નમઃ । ૐ શેષાય નમઃ । ૐ અનન્તાય નમઃ ।

॥ ભૂતશુદ્ધિઃ ॥
ૐ અપસર્પન્તુ તે ભૂતા યે ભૂતા ભૂમિસંસ્થિતાઃ ।
યે ભૂતા વિઘ્નકર્તારસ્તે નશ્યન્તુ શિવાજ્ઞયા ॥

અપક્રમન્તુ ભૂતાનિ પિશાચાઃ સર્વતોદિશમ્ ।
સર્વેષામવિરોધેન સન્ધ્યાકર્મ સમારમ્ભે ॥

(bhUtashuddhI in Tantric sense refers to the pa nchabhUta
elements within the body is expressed by
ૐ ભૂતશૃઙ્ગાટાચ્છિરઃ સુષુમ્નાપથેન જીવશિવં પરમશિવપદે યોજયામિ સ્વાહા ॥ ૧॥
ૐ યં લિઙ્ગશરીરં શોષય શોષય સ્વાહા ॥ ૨॥
ૐ રં સંકોચશરીરં દહ દહ સ્વાહા ॥ ૩॥
ૐ પરમશિવ સુષુમ્નાપથેન મૂલશૃઙ્ગાટમુલ્લસોલ્લસ જ્વલ જ્વલ પ્રજ્જ્વલ પ્રજ્જ્વલ સોહહં હંસ સ્વાહા ॥૪॥)

॥ માર્જનમ્ ॥
ૐ ભુઃ પુનાતુ (શિરસિ)
ૐ ભુવઃ પુનાતુ (નેત્રયોઃ)
ૐ સ્વઃ પુનાતુ (કણ્ઠે)
ૐ મહઃ પુનાતુ (હૃદયે)

ૐ જનઃ પુનાતુ (નાભ્યામ્)

ૐ તપઃ પુનાતુ (પાદયોઃ)

ૐ સત્યં પુનાતુ (પુનઃ શિરસિ)

ૐ તત્સવિતુર્વ્વરેણ્યમ્ભર્ગ્ગો દેવસ્ય ધીમહિ ॥ ધિયોયોનઃ

પ્રચોદયાત્ ॥ (સર્વાઙ્ગં પુનાતુ)

॥ કરન્યાસઃ ॥

ૐ અઙ્ગુષ્ઠાગ્રે તુ ગોવિન્દં તર્જન્યાં તુ મહીધરમ્ ।

મધ્યમાયાં હૃષિકેશમનામિક્યાં ત્રિવિક્રમમ્ ॥

કનિષ્ઠિક્યાન્યસેદ્વિષ્ણું કરમધ્યે તુ માધવમ્ ।

કરપૃષ્ઠે હરિં વિદ્યન્મણિબન્ધે જનાર્દનમ્ ॥

॥ ગાયત્રીષડઙ્ગન્યાસાઃ ॥

ૐ ભુઃ હૃદયાય નમઃ ।

ૐ ભુવઃ શિરસે સ્વાહા ।

ૐ સ્વઃ શિખાયૈ વષટ્ ।

ૐ તત્સવિતુર્વ્વરેણ્યં કવચાય હુમ્ ।

ૐ ભર્ગ્ગો દેવસ્ય ધીમહિ નેત્રત્રયાય વૌષટ્।

ૐ ધિયોયોનઃ પ્રચોદયાત્ અસ્ત્રાય ફટ્ ।

॥ પ્રણવન્યાસાઃ ॥

ૐ અકારમ્ નભૌ ।

ૐ ઉકારમ્ હૃદયે ।

ૐ મકારમ્ મૂર્ધ્નિ ।

ૐ ભુઃ પાદયોઃ ।

ૐ ભુવઃ જાન્વોઃ ।

ૐ સ્વઃ ઊર્વોઃ ।

ૐ મહઃ જઠરે ।

ૐ જનઃ કણ્ઠે ।

ૐ તપઃ મુખે ।

સત્યમ્ શિરસિ ॥

ૐ તત્સવિતુર્વ્વરેણ્યમ્ભર્ગ્ગો દેવસ્ય ધીમહિ ॥ ધિયોયોનઃ

પ્રચોદયાત્ ॥ (સર્વાઙ્ગે)

॥ ગાયત્ર્યાવાહાનમ્ ॥

ૐ ગાયત્રીં ત્ર્યક્ષરાં બાલાં સાક્ષસૂત્રકમણ્ડલુમ્ ।
રક્તવસ્ત્રાં ચતુર્હસ્તાં હંસવાહન્સંસ્થિતામ્ ॥

બ્રહ્માણીં બ્રહ્મદૈવત્યાં બ્રહ્મલોકાનિવાસિનીમ્ ।
આવાહયામ્યહં દેવીમાયાન્તીં સૂર્યમણ્ડલાત્ ॥

આગચ્છ વરદે દેવિ ત્ર્યક્ષરે બ્રહ્મવાદિનિ ।
ગાયત્રિ છન્દસાં માતર્બ્રહ્મયોનિ નમોઽસ્તુ તે ॥

॥ અમ્બુપ્રાશનમ્ ॥ ॥ વિનિયોગઃ ॥

ૐ સૂર્યશ્ચમેત્યસ્ય નારાયણઃ ઋષિઃ સૂર્યો દેવતા અનુષ્ટુબ્છ્ન્દઃ
અમ્બુપ્રાશને વિનિયોગઃ ॥

ૐ સૂર્યશ્ચમા મન્યુશ્ચ મન્યુપતયશ્ચ મન્યુકૃતેભ્યઃ
પાપેભ્યો રક્ષન્તાં યદ્રાત્ર્યા પાપમકાર્ષં
મનસા વાચા હસ્તાભ્યાં પદ્ભ્યામુદરેણ શિશ્ના
રાત્રિસ્તદવલુમ્પતુ યત્કિઞ્ચિદ્દુરિતં મયિ
ઇદમહં મામમૃતયોનૌ સૂર્ય્યે જ્યોતિષિ જુહોમિ સ્વાહા ॥

॥ માર્જનમ્ ॥ ॥ વિનિયોગઃ ॥

ૐ આપોહિષ્ઠેતિ તિસૃણાં સિન્ધુદ્વિપ ઋષિઃ ગાયાત્રિછ્ન્દઃ
આપોદેવતા માર્જને વિનિયોગઃ ॥

॥ માર્જનમ્ ॥

ૐ આપોહિષ્ઠામયો ભુવસ્તાનઽ ઊર્જ્જેદધાતન । મહેરણાય
ચક્ષસે ॥

યોવઃ શિવતમોરસસ્તસ્ય ભાજયતેહનઃ । ઉશતીરિવમાતરઃ ॥

તસ્મ્માઽરઙ્ગ મામવોયસ્ય ક્ષયાયજિન્ન્વથઽ આપો જનયથાચનઃ

॥ અઘમર્ષણમ્ ॥

॥ વિનિયોગઃ ॥

ૐ દ્રુપાદિવેત્યસ્ય કોકિલરાજપુત્ર ઋષિઃ અનુષ્ટુબ્છન્દઃ આપો
દેવતા અઘમર્ષણે વિનિયોગઃ ॥

॥ અઘમર્ષણમ્ ॥

ॐ દ્રુપદાદિવમુમુચાનઃ સ્વિન્નઃસ્નાતોમલાદિવ ॥

પૂતમ્પવિત્રેણેવાજ્જ્યમાપઃ શુન્ધન્તુમૈનસઃ ॥

(અનેન મન્ત્રેણ પાપં ધ્યાત્વા તજ્જલં વામતઃ ક્ષિપેત્)

॥ અર્ઘ્યમ્ ॥

ॐ ભૂર્ભુવઃસ્વઃ ॐ તત્સવિતુર્વ્વરેણ્યમ્ભર્ગ્ગો દેવસ્ય ધીમહિ ॥

ધિયોયોનઃ પ્ર્રચોદયાત્ ॥

ॐ પ્રાતઃ સન્ધ્યાયાં બ્રહ્મ સ્વરૂપિણે સવિત્રે સૂર્યનારાયણાય નમઃ ।
ઇદમર્ઘ્યં દત્તં ન મમ ॥

(એવમ ત્રિવારં અર્ઘ્યં દદ્યાત્)

ॐ અસાવાદિત્યો બ્રહ્મ

॥ સૂર્યોપસ્થાનમ્ ॥

ॐ ઉદ્વયન્તમસસ્પ્પરિસ્વઃ પશ્શ્યન્તઽ ઉત્તરમ્ ॥ દેવન્દેવત્ર
સૂર્ય્યમગન્મજ્જ્યોતિરુત્તમમ્ ॥

ઉદુત્ત્યઞ્જાતવેદસન્દેવં વ્વહન્તિ કેતવઃ ॥ દૃશેવ્વિશ્શ્વાયસૂર્ય્યમ્ ॥

ॐ ચિત્રન્દેવાનામુદગાદની કં ચક્ષુર્મ્મિત્રસ્યવ્વરુણસ્યાગ્ગ્નેઃ ॥

આપ્પ્રાદ્ધ્યાવાપૃથિવીઽન્તરિક્ષꣳ સૂર્ય્ય આત્મા
જગતસ્તસ્થુષશ્ચ ॥

ॐ તચ્ચક્ષુર્દ્દેવહિતમ્પુરસ્તાચ્છુક્રમુચ્ચરત્ ॥

પશ્શ્યેમશરદઃ શતઞ્જીવેમશરદઃ
શતꣳ શꣳ‍ૃણુયામશરદઃ શતમ્પ્રબ્બ્રવામ શરદઃ શતમદીનાઃ
સ્યામશરદઃ શતમ્ભૂયશ્શ્ચશરદઃ શતાત્ ॥

॥ વિનિયોગઃ ॥

ॐ તેજોસીત્યસ્ય પરમેષ્ઠી પ્રજાપતિરૃષિઃ આજ્યં દેવતા જગતી
છન્દઃ યજુર્ગાયત્ર્યાવાહને વિનિયોગઃ

॥ ગાયત્ર્યાવાહનમ્ ॥

ॐ
તેજોસિશુક્ક્રમસ્યમૃતમસિધામનામાસિપ્પ્રિયન્દેવાનામનાધૃષ્ટ્ટન્દેવયજનમસિ

॥

॥ અથ મુદ્રપ્રદર્શનમ્ ॥

ૐ સુમુખં સમ્પુટં ચૈવ વિતતં વિસ્તૃતં તથા ।
દ્વિમુખં ત્રિમુખં ચૈવચતુષ્પઞ્ચમુખં તથા ॥

ષણ્મુખાધોમુખં ચૈવ વ્યાપકાઞ્જલિકં તથા ।
શકટં યમપાશં ચ ગ્રથિતં ચોન્મુખોન્મુખમ્ ॥

પ્રલમ્બં મુષ્ટિકં ચૈવ મત્સ્યઃ કૂર્મો વરાહકમ્।
સિંહાક્રાન્તાં મહાક્રાન્તં મુદ્ગરં પલ્લવં તથા॥

॥ શાપવિમોચનમ્ ॥

ૐ ભો ગાયત્રિ દેવિ ત્વં બ્રહ્મશાપાદ્વિમુક્તા ભવ ॥

ૐ ભો ગાયત્રિ દેવિ ત્વં વસિષ્ઠશાપાદ્વિમુક્તા ભવ ॥

(મહામુદ્રં (યોનિમુદ્રાં) પ્રદર્શ્ય ત્રિવારં મનસિ ગાયત્રીમન્ત્રં જપેત્)
ૐ ભૂર્ભુવઃસ્વઃ ૐ તત્સવિતુર્વ્વરેણ્યમ્ભર્ગ્ગો દેવસ્ય ધીમહિ ॥

ધિયોયોનઃ પ્રચોદયાત્ ॥

ૐ ભો ગાયત્રિ દેવિ ત્વં વિશ્વામિત્રશાપાદ્વિમુક્તા ભવ ॥

ૐ ભો ગાયત્રિ દેવિ ત્વં શુક્રશાપાદ્વિમુક્તા ભવ ॥

॥ અથ ગાયત્રીધ્યાનમ્ ॥

મુક્તાવિદ્રુમહેમનીલધવલાચ્છાયૈર્મુખૈસ્ત્રીક્ષણૈ
ર્યુક્તામિન્દુનિબદ્ધરત્નમુકુટાં તત્ત્વાર્થવર્ણાત્મિકામ્ ।
ગાયત્રીં વરદાભયાઙ્કુશકશાં શુભ્રં કપાલં ગુણં
શઙ્ખં ચક્રમથારવિન્દયુગલં હસ્તૈર્વહન્તીં ભજે ॥

॥ પશ્ચાદ્ ૧૦૮ વારં ગાયત્રીમન્ત્રં જપેત્ ॥

ૐ સુરભિર્જ્ઞાનં વૈરાગ્યં યોનિઃ શઙ્ખોઽથ પઙ્કજમ્ ।
લિઙ્ગં નિર્વાણેતિ જપેત્ ॥

॥ જપાર્ણમ્ ॥

ૐ અનેન પ્રાતઃસન્ધ્યાઙ્ગભુતેન યથાશક્તિ ગાયત્રીમન્ત્રજપેન
ગાયત્રી દેવી પ્રીયતાં ન મમ ॥

॥ પ્રાર્થના ॥

ॐ યદક્ષરપદભ્રષ્ટં માત્રાહીનં ચ યદ્ભવેત્ ।
તત્સર્વં ક્ષમ્યતાં દેવિ પ્રસીદ પરમેશ્વરિ ॥

ઉત્તરે શિખરે દેવિ ભૂમ્યાં પર્વતમૂર્ધનિ ।
બ્રાહ્મણેભ્યોઽભ્યનુજ્ઞાતા ગચ્છ દેવિ યથાસુખમ્ ॥

॥ ગોત્રપ્રવરોચ્ચારણપૂર્વકમભિવાદનમ્ ॥
અમુકગોત્રોત્પન્નઃ અમુકપ્રવરાન્વિતઃ શુક્લયજુર્વેદાન્તર્ગતવાજસનેયિ
માધ્યાન્દિનીયશાખાધ્યાયી અમુકશર્માહમ્ ॥

ભો આચાર્ય ! ત્વામભિવાદયામિ ।
ભો વૈશ્વાનર ! ત્વામભિવાદયામિ ।
ભો સૂર્યચન્દ્રમસૌ ! યુવામભિવાદયામિ ।
ભો માતાપિતરૌ ! યુવામભિવાદયામિ ।
ભો યાજ્ઞવલ્ક્ય ! ત્વામભિવાદયામિ ।
ભો ઈશ્વર ! ત્વામભિવાદયામિ ।

॥ સન્ધ્યાર્પણમ્ ॥
ॐ અનેન પ્રાતઃ સન્ધ્યોપાસનાખ્યેન કર્મણા ભગવાન્ બ્રહ્મસ્વરૂપી
પરમેશ્વરઃ પ્રીયતાં ન મમ ॥

ॐ તત્સદ્ બ્રહ્માર્પણમસ્તુ ॥

(ત્રિરાચમેત્)

॥ હસ્તૌ બદ્ધ્વા ॥
ॐ યસ્ય સ્મૃત્યા ચ નામોક્ત્યા તપોયજ્ઞક્રિયાદિષુ ।
ન્યૂનં સમ્પૂર્ણતાં યાતિ સદ્યો વન્દે તમચ્યુતમ્ ॥

ॐ વિષ્ણવે નમઃ । ॐ વિષ્ણવે નમઃ । ॐ વિષ્ણવે નમઃ ।

ॐ તત્સદ્ બ્રહ્માર્પણમસ્તુ

॥ ઇતિ પ્રાતઃ સન્ધ્યાપ્રયોગઃ ॥

---

॥ અથ શુક્લયજુર્વેદીયમધ્યાહ્નસન્ધ્યાપ્રયોગઃ ॥

॥ સઙ્કલ્પઃ ॥
ॐ અત્રાદ્ય મહામાઙ્ગલ્યફલપ્રદમાસોત્તમેમાસે અમુકમાસે

અમુકપક્ષે અમુકતિથૌ અમુકવાસરે મમોપાત્તદુરિતક્ષયર્થં
રુદ્રાવાપ્તયે મધ્યાહ્નસન્ધ્યોપાસનમહં કરિષ્યે ॥

॥ સાવિત્ર્યાવાહનમ્ ॥
ૐ સાવિત્રીં યુવતીં શુક્લાં શુક્લવસ્ત્રાં ત્રિલોચનામ્ ।
ત્રિશૂલિનીં વૃષારૂઢાં રુદ્રરૂપિણીસંસ્થિતામ્ ॥

રુદ્રાણીં રુદ્રદૈવત્યાં રુદ્રલોકાનિવાસિનીમ્ ।
આવહયામ્યહં દેવીમાયાન્તીં રુદ્રમણ્ડલાત્ ॥

આગચ્છ વરદે દેવિ ત્ર્યક્ષરે રુદ્રવાદિનિ ।
સાવિત્રિ છન્દસાં માતર્રુદ્રયોનિ નમોઽસ્તુતે ॥

॥ અમ્બુપ્રાશનમ્ ॥

॥ વિનિયોગઃ ॥

ૐ આપઃ પુનન્ત્વિતિ મન્ત્રસ્ય નારાયણ ઋષિઃ આપો દેઅવતા ગાયાત્રી
છન્દઃ અમ્બુપ્રાશને વિનિયોગઃ ॥

॥ અમ્બુપ્રાશનમ્ ॥
ૐ આપઃ પુનન્તુ પૃથવીં પૃથવીપૂતા પુનાતુ મામ્ । પુનન્તુ
બ્રહ્મણસ્પતિર્હ્મપૂતા પુનાતુ મામ્ ॥

યદુચ્છિષ્ટમભોજ્યં ચ યદ્વાદુશ્ચરિતં મમ, સર્વાં પુનન્તુ
મામાપો સતાઞ્ચ પ્રતિગ્રહꣳ સ્વાહા ॥

॥ અર્ઘ્યમ્ ॥ (એકવારં ગાયત્રીમન્ત્રેણ અર્ઘ્યં દદ્યાત્)
ૐ આકૃષ્ણેનરજસાવ્વર્ત્તમાનો નિવેશયન્નમૃતમ્મર્ત્યઞ્ચ ॥

હિરણ્યયેનસવિતારથેનાદેવોયાતિ ભુવનાનિપશ્યન્ ॥

ૐ મધ્યાહ્નસન્ધ્યાયાં રુદ્ર સ્વરુપિણે સવિત્રે સૂર્યનારાયણાય નમઃ ।
ઇદમર્ઘ્યં દત્તં ન મમ ॥ ૐ અસાવાદિત્યો બ્રહ્મ ॥

॥ જપાર્ણમ્ ॥
ૐ અનેન મધ્યાહ્નસન્ધ્યાઙ્ગભુતેન યથાશક્તિ ગાયત્રીમન્ત્રજપેન
ગાયત્રી દેવી પ્રીયતાં ન મમ ॥

॥ સન્ધ્યાર્પણમ્ ॥
ૐ અનેન મધ્યાહ્નસન્ધ્યોપાસનાખ્યેન કર્મણા ભગવાન્ રુદ્રસ્વરૂપી

પરમેશ્વરઃ પ્રીયતાં ન મમ ॥

ૐ તત્સદ્ બ્રહ્માર્પણમસ્તુ ॥

ત્રિરાચમેત્ ।

॥ ઇતિ મધ્યાહ્નસન્ધ્યાપ્રયોગઃ ॥

---

॥ અથ શુક્લયજુર્વેદીયસાયંસન્ધ્યાપ્રયોગઃ ॥

॥ સઙ્કલ્પઃ ॥

ૐ અત્રાદ્ય મહામાઙ્ગલ્યફલપ્રદમાસોત્તમેમાસે અમુકમાસે
અમુકપક્ષે અમુકતિથૌ અમુકવાસરે મમોપાત્તદુરિતક્ષયર્થં
વિષ્ણુવાપ્તયે સાયંસન્ધ્યોપાસનમહં કરિષ્યે ॥

॥ સરસ્વત્યાવાહનમ્ ॥

ૐ વૃદ્ધાં સરસ્વતીં કૃષ્ણાં પીતવસ્ત્રાં ચતુર્ભુજામ્ ।
શઙ્ખચક્રગદાપદ્મહસ્તાં ગરુડવાહિનીમ્ ॥

વૈષ્ણવીં વિષ્ણુદૈવત્યાં  વિષ્ણુલોકનિવાસિનીમ્ ।
આવાહયામ્યહં દેવીમાયાન્તીં વિષ્ણુમણ્ડલાત્ ॥

આગચ્છ વરદે દેવિ ત્ર્યક્ષરે વિષ્ણુવાદિનિ ।
સરસ્વતિ છન્દસા માતાર્વિષ્ણુયોનિ નમોઽસ્તુતે ॥

॥ અમ્બુપ્રાશનમ્ ॥  ॥ વિનિયોગઃ ॥

ૐ અગ્નિશ્ચમેત્યસ્ય નારાયણઃ ઋષિઃ અગ્નિર્દેવતા અનુષ્ટુબ્છ્ન્દઃ
અમ્બુપ્રાશને વિનિયોગઃ ॥

ૐ અગ્નિશ્ચમા મન્યુશ્ચ મન્યુપતયશ્ચ મન્યુકૃતેભ્યઃ
પાપેભ્યો રક્ષન્તાં યદહ્ના પાપમકાર્ષં
મનસા વાચા હસ્તાભ્યાં પદ્ભ્યામુદરેણ શિશ્ના
અહસ્તદવલુમ્પતુ યત્કિઞ્ચિદ્દુરિતં મયિ
ઇદમહં મામમૃતયોનૌ સત્યે જ્યોતિષિ જુહોમિ સ્વાહા ॥

॥ અર્ઘ્યમ્ ॥ (ત્રિવારં ગાયત્રીમન્ત્રેણ અર્ઘ્યં દદ્યાત્)
ૐ સાયંસન્ધ્યાયાં વિષ્ણુ સ્વરૂપિણે સવિત્રે સૂર્યનારાયણાય નમઃ ।
ઇદમર્ઘ્યં દત્તં ન મમ ॥

॥ જપાર્ણમ્ ॥

ૐ અનેન સાયંસન્ધ્યાઙ્ગભુતેન યથાશક્તિ ગાયત્રીમન્ત્રજપેન
ગાયત્રી દેવી પ્રીયતાં ન મમ ॥

॥ સન્ધ્યાર્પણમ્ ॥

ૐ અનેન સાયંસન્ધ્યોપાસનાખ્યેન કર્મણા ભગવાન્ વિષ્ણુસ્વરૂપી
પરમેશ્વરઃ પ્રીયતાં ન મમ ॥

ૐ તત્સદ્ બ્રહ્માર્પણમસ્તુ ॥

ત્રિરાચમેત્ ।

॥ ઇતિ સાયંસન્ધ્યાપ્રયોગઃ ॥

Encoded and proofread by Krunal Makwana makwanakb at googlemail.com

*Shukla YajurvedIya SandhyA Morning-Noon-Evening*

pdf was typeset on March 18, 2025

Please send corrections to *sanskrit@cheerful.com*